निष्काशितस्नेहत्वात् तथात्वम्। वा विसर्गस्य सत्वम्।

**निःस्नेहफला** स्त्री निःस्नेहं फलं यस्याः। श्वेतकण्टकार्य्यां राजनि०। [स्वपि निःस्पृहोऽभवत्" रघुः।

**निःस्पृह** त्रि०निर्गता स्पृहाऽस्य। आशाशून्ये "त्रिदिवस्थे·

**निःस्रव** पु०निर्+स्रु—अप्। अवशेषे "राजनि स्थापितो योऽर्थः प्रत्यहं तेन विक्रयः। क्रयो वा, निस्रवस्तस्मात् वणिजां लाभकृत् स्मृतः" याज्ञ० "निःस्रवः अवशेषः" मिता०।

**निःस्राव** पु०निःस्रवति निर्+स्रु—ण। (माड)(फेन) १भक्तरसे हेमच० भावे घञ्। २व्यये "बह्वादानोऽल्पनिःस्रावः ख्यातः पूजितदैवतः" कामन्द०।

**निःस्व** त्रि० निर्गतं स्वमस्य प्रा०ब०। १दरिद्रे "शूर्पकारौ विरूक्षौ च वक्रौ पादौ शिरालकौ। संशुष्कौ पाण्डुरनखौ निःस्वस्य विरलाङ्गुली" गरुडपु०। २धनरहिते ३ज्ञातिरहिते च।

**निःस्वभाव** त्रि० निर्गतः स्वभावो यस्य प्रा०ब०। स्वभावशून्ये। बौद्धमते वस्तुमात्रस्य निःस्वभावत्वम् यथोक्तं लङ्कावतारे "बुद्ध्या विविच्यमानानां स्वभावो नावधार्य्यते। अतो निरभिलप्यास्ते निःस्वभावाश्च दर्शिताः" (ते पदार्थाः)

**निकक्ष** अव्य० कक्षस्य समीपम् सामीप्येऽव्ययी०। पश्चिमापरसक्थिसमीपे "चित्यं परिषिञ्चत्यग्नीद्दक्षिणे निकक्षे" कात्या०श्रौ०१८।२।१ "पश्चिमापरसक्थिः कक्षस्तस्य समीपं निकक्षम्" वेददी०। अव्ययीभावे अदन्तात् सप्तम्या वा न लुक्।

**निकट** त्रि० निबद्धम् निबद्धार्थात् नेः "सम्प्रोदश्च" पा० चात् कटच्। आसन्ने सम्बद्धे। "अदूरे गम्यतां किञ्चिन्निकटं सरः" पञ्चत०।

**निकर** पु० नि+कृ+भावादौ अप्। १समूहे अमरः। २सारे ३न्यायदत्तधने ४निधौ च मेदि० "निष्यन्दिनीरनिकरेण कृताभिषेका" माघः।

**निकर्षण** न०निर्गतं कर्षणमस्मात् प्रा०ब०। १कर्षणरहिते भूभागे २गृहादिपरिच्छिन्नदेशे सन्निवेशे ३पुरग्रामाद्बहिर्भागस्थविहारभूमौ कर्षणशून्यत्वात् तयोस्तथात्वम्।

**निकष(स)** पु० नि+कष(स)—अच् निकष(स)त्यनेन करणे घो वा। १कषणे २कषपाषाणे च (कषटीपातर) अमरः। "निकषे हेमरेखेव श्रीरासीदनपायिनी" रघुः कर्मणि घ। ३परीक्षार्थं कषणकर्म्महेमादौ त्रि० "यदा निर्गुण-

माप्नोति ध्यानं मनसि पूर्वजम्। तदा प्रज्ञायते ब्रह्म निकषं निकषे यथा" भा०शा० २०५अ०। ४शाणे अस्त्रादितीक्ष्णतासाधनास्त्रे अमरः।

**निकषा** अव्य० नि+कष—बा० आ। १निकटे अमरः। "विलङ्घ्य लङ्कां निकषा हनिष्यति" माघः निकषायोगे शेषार्थे द्वितीया २मध्ये च मेदि०। ३राक्षसमातरि स्त्री

**निकषात्मज** पु० ६त०। राक्षसे अमरः।

**निकषोपल** पु० कर्म०। १शाणे (कषटी) २प्रस्तरभेदे च।

**निकाम** न० नि+कम—घञ् अभिधानात् क्लीवता। १दृष्टानतिक्रमे २पर्य्याप्ते ३अतिशये च अमरः। "निकामतप्ता विविधेन वह्निना" कुमा० "नित्यं हरेः सन्निहिता निकामम्" माघः।

**निकामन्** त्रि० नि+कम बा० मनिन्। नितरां कामुके "सिषक्ति सूजमानानि कामभिः" ऋ०१०।९२।६। "निकामभिः नितरामभिलाषुकैः" भा०।

**निकाय** पु० नि+चि—घञ् कुत्वम्। १निवासे २सजातीयप्राणिसङ्घे ३लक्ष्ये ४परमात्मनि मेदि० "तथा देवनिकायानां श्रेष्ठ्याच्च दिवौकसाम्" भा०आ० १२३अ०। "तस्य सर्वनिकायेषु निर्झरेषु गुहासु च" रामा०४।४४।२१

**निकाय्य** पु० नि+चि—ण्यत् कुत्वम्। गृहे अमरः। "न प्रणाय्यः जनः कश्चित् निकाय्यं तेऽधितिष्ठति" भट्टिः।

**निकार** पु० नि+कृ—कृ—वा भावे घञ्। १मारणे २परिभवे अमरः "राज्ञां निकारे सहसा प्रवृत्तः" भा० आ० १८९अ०। "निकारोऽयं पश्चाद्वनमहह भोक्तव्य निधनम्" शान्ति०श० ३भर्त्सने च ४धान्यादेरूर्द्ध्वक्षेपणे अमरः। ५खलीकारे शब्दमा०।

**निकारण** न० नि+कृ—णिच्—ल्युट्। १मारणे २वधे अमरः

**निकाल्य** त्रि० नि+कल—ण्यत्। चालनीये त्रिका०।

**निकाश** पु०नि+काश—घञ्। १प्रकाशे २समीपे च। तुल्यार्थे अस्य निभादित्वात् नित्यस० वा दीर्घस्य। "उवाच पूर्णेन्दुनिकाशवक्त्राम्" हरिवं १५४ अ० "आकर्णमुल्लसितमम्बु विकाशिकाशनीकाशमाप समतां सितचामरस्य" माघः। शब्दश्चोऽस्य न पृथक्प्रयोगः।

**निकाष** पु० नि+कष—भावे घञ्। समुल्लिखने कषणे "तेजोभिः कनकनिकाषराजिगौरैः" किरा०।

**निकास** पु०नि+कास—घञ्। प्रकाशे नीकाशशब्दार्थे शब्दमहार्णवे भरतः निभादिवत् नास्य पृथक्प्रयोगः।